श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिचत्वारिंशः सर्गः ॥

## भद्रेण पौराणां मुखादाकर्णितायाः सीताविषयकाशुभचर्चायाः श्रीरामसमक्षे निवेदनम्

तत्रोपविष्टं राजानमुपासन्ते विचक्षणाः।
कथानां बहुरूपाणां हास्यकाराः समन्ततः॥ **7.43.1** ॥

विजयो मधुमत्तश्च काश्यपो मङ्गलः कुलः।
सुराजिः कालियो भद्रो दन्तवक्त्रः सुमागधः॥ **7.43.2** ॥

एते कथा बहुविधाः परिहाससमन्विताः।
कथयन्ति स्म संहृष्टा राघवस्य महात्मनः॥ **7.43.3** ॥

ततः कथायां कस्याञ्चिद् राघवः समभाषत।
काः कथा नगरे भद्र वर्तन्ते विषयेषु च॥ **7.43.4** ॥

मामाश्रितानि कान्याहुः पौरजानपदा जनाः।
किं च सीतां समाश्रित्य भरतं किं च लक्ष्मणम्॥ **7.43.5** ॥

किं नु शत्रुघ्नमुद्दिश्य कैकेयीं किं नु मातरम्।
वक्तव्यतां च राजानो वने राज्ये व्रजन्ति च॥ **7.43.6** ॥

एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत्।
स्थिताः शुभाः कथा राजन् वर्तन्ते पुरवासिनाम्॥ **7.43.7** ॥

अमुं तु विजयं सौम्य दशग्रीववधार्जितम्।
भूयिष्ठं स्वपुरे पौरैः कथ्यन्ते पुरुषर्षभ॥ **7.43.8** ॥

एवमुक्तस्तु भद्रेण राघवो वाक्यमब्रवीत्।
कथयस्व यथातत्त्वं सर्वं निरवशेषतः॥ **7.43.9** ॥

शुभाशुभानि वाक्यानि कान्याहुः पुरवासिनः।
श्रुत्वेदानीं शुभं कुर्यां न कुर्यामशुभानि च॥ **7.43.10** ॥

कथयस्व च विस्रब्धो निर्भयं विगतज्वरः।
कथयन्ति यथा पौराः पापा जनपदेषु च॥ **7.43.11** ॥

राघवेणैवमुक्तस्तु भद्रः सुरुचिरं वचः।
प्रत्युवाच महाबाहुं प्राञ्जलिः सुसमाहितः॥ **7.43.12** ॥

शृणु राजन् यथा पौराः कथयन्ति शुभाशुभम्।
चत्वरापणरथ्यासु वनेषूपवनेषु च॥ **7.43.13** ॥

दुष्करं कृतवान् रामः समुद्रे सेतुबन्धनम्।
अश्रुतं पूर्वकैः कैश्चिद् देवैरपि सदानवैः॥ **7.43.14** ॥

रावणश्च दुराधर्षो हतः सबलवाहनः।
वानराश्च वशं नीता ऋक्षाश्च सह राक्षसैः॥ **7.43.15** ॥

हत्वा च रावणं सङ्ख्ये सीतामाहृत्य राघवः।
अमर्षं पृष्ठतः कृत्वा स्ववेश्म पुनरानयत्॥ **7.43.16** ॥

कीदृशं हृदये तस्य सीतासम्भोगजं सुखम्।
अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम्॥ **7.43.17** ॥

लङ्कामपि पुरा नीतामशोकवनिकां गताम्।
रक्षसां वशमापन्नां कथं रामो न कुत्स्यति॥ **7.43.18** ॥

**अस्माकमपि दारेषु सहनीयं भविष्यति।**
**यथा हि कुरुते राजा प्रजास्तमनुवर्तते॥ 7.43.19 ॥**

**एवं बहुविधा वाचो वदन्ति पुरवासिनः।**
**नगरेषु च सर्वेषु राजन् जनपदेषु च॥ 7.43.20 ॥**

**तस्यैवं भाषितं श्रुत्वा राघवः परमार्तवत्।**
**उवाच सुहृदः सर्वान् कथमेतद् वदन्तु माम्॥ 7.43.21 ॥**

**सर्वे तु शिरसा भूमावभिवाद्य प्रणम्य च।**
**प्रत्यूचू राघवं दीनमेवमेतन्न संशयः॥ 7.43.22 ॥**

**श्रुत्वा तु वाक्यं काकुत्स्थः सर्वेषां समुदीरितम्।**
**विसर्जयामास तदा वयस्याञ्छत्रुसूदनः॥ 7.43.23 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिचत्वारिंशः सर्गः॥